# श्री बलराम कवचं

**श्री बलराम कवचं**

दुर्योधन उवाच |
गोपीभ्यः कवचं दत्तं गर्गाचार्येण धीमता |
सर्वरक्षाकरं दिव्यं देहि मह्यं महामुने || 1 ||

प्राड्विपाक उवाच |
स्नात्वा जले क्षौमधरः कुशासनः
पवित्रपाणिः कृतमंत्रमार्जनः |
स्मृत्वाथ नत्वा बलमच्युताग्रजं
संधारयेद्धर्मसमाहितो भवेत् || 2 ||

गोलोकधामाधिपतिः परेश्वरः
परेषु मां पातु पवित्रकीर्तनः |
भूमंडलं सर्षपवद्विलक्ष्यते
यन्मूर्ध्नि मां पातु स भूमिमंडले || 3 ||

सेनासु मां रक्षतु सीरपाणिः
युद्धे सदा रक्षतु मां हली च |
दुर्गेषु चाव्यान्मुसली सदा मां
वनेषु संकर्षण आदिदेवः || 4 ||

कलिंदजावेगहरो जलेषु
नीलांबरो रक्षतु मां सदाग्नौ |
वायौ च रामोऽवतु खे बलश्च
महार्णवेऽनंतवपुः सदा मां || 5 ||

श्रीवासुदेवोऽवतु पर्वतेषु
सहस्रशीर्षा च महाविवादे |
रोगेषु मां रक्षतु रौहिणेयो
मां कामपालोऽवतु वा विपत्सु || 6 ||

कामात्सदा रक्षतु धेनुकारिः
क्रोधात्सदा मां द्विविदप्रहारी |
लोभात्सदा रक्षतु बल्वलारिः
मोहात्सदा मां किल मागधारिः || 7 ||

प्रातः सदा रक्षतु वृष्णिधुर्यः
प्राह्णे सदा मां मथुरापुरेंद्रः |
मध्यंदिने गोपसखः प्रपातु
स्वराट् पराह्णेऽवतु मां सदैव || 8 ||

सायं फणींद्रोऽवतु मां सदैव
परात्परो रक्षतु मां प्रदोषे |
पूर्णे निशीथे च दुरंतवीर्यः
प्रत्यूषकालेऽवतु मां सदैव || 9 ||

विदिक्षु मां रक्षतु रेवतीपतिः
दिक्षु प्रलंबारिरधो यदूद्वहः |
ऊर्ध्वं सदा मां बलभद्र आरा-
-त्तथा समंताद्बलदेव एव हि || 10 ||

अंतः सदाव्यात्पुरुषोत्तमो बहि-
-र्नागेंद्रलीलोऽवतु मां महाबलः |
सदांतरात्मा च वसन् हरिः स्वयं
प्रपातु पूर्णः परमेश्वरो महान् || 11 ||

देवासुराणां भयनाशनं च
हुताशनं पापचयेंधनानां |
विनाशनं विघ्नघटस्य विद्धि
सिद्धासनं वर्मवरं बलस्य || 12 ||

इति श्रीगर्गसंहितायां बलभद्रखंडे बलरामकवचं |